नं० ५६८१-घ

शिवाबलिविधानम् (तन्त्रम्)

पत्राणि ३ (त्रीण्येव) (सम्पूर्णम्)

शिवाबलिविधान १६३

श्री॰
१

ॐ श्रीगुरवे शिवायै नमः अथ शिवाबलिप्रकारः तत्र कुत्रचि
द्गृहः स्थाने श्रीकालीपद्धत्युक्तक्रमेण सर्वान्पूजां यथाविधि
विधाय ऐशान्यां दिशि मंडलं कृत्वा सामान्यार्घ्यप्रोक्षणीपात्रां
बुना संप्रोक्ष्य पीठपूजां तत्र कृत्वा गंधाक्षतपुष्पधूपदीपादि-
नाभ्यर्च्य पृथक्पृथक् कुत्रचिदमृतं कस्मिंश्चिन्मांसं मत्स्यं
कुत्रचिन्मुद्रा कस्मिंश्चिच्छुष्कुमांसामिषामोदकादि निक्षिप्य का
लीकालीति शिवां कालीसमाहूय क्रीं श्रीं एहि महाकालि बलिं
गृह्ण २ गृह्णापय २ मदीयेऽस्मालये आगच्छ २ मम कार्यं सा
धय २ प्रसादं कुरु २ सर्वसिद्धिं देहि २ स्वाहा गृह्ण देवि महाभा
गे शिवे कालाग्निरूपिणि शुभाशुभफलं व्यक्तिं ब्रूहि गृह्ण बलिं

मम इति मंत्रं त्रिः पठित्वा ततोऽन्यत्र कुत्रचित्समीपस्थे स्था
ने स्वात्मानं रहः स्थित्वा उल्कामुखि घोररावे गुहाकाननवासि
नि कृपां कुरु महाभागे नमस्ते चंडि वल्लभे १ संग्रामशीले श
वाग्रि शवमांसप्रमोदिनि पाहि मां संकटहरे नमस्ते चितिवासि
नि २ फलमूलाशने देवि चंडिके चंडनादिनि भयेभ्यो रक्ष्य मां
देवि पशुरूपे विराविनि ३ शिशुप्रिये शिवामोदे दिक्चक्रभ्रम
कारिणि शुभाशुभफलं ब्रूहि नमस्तेऽस्तु कालिकाप्रिये ४ कालि
कापीठनिलये मांसास्थिशोणितप्रिये लेलिह्यमानजिह्वाभि
र्नमस्ते तारिणीप्रिये ५ प्रचंडचंडिके देवि शिवाशतनिनादिनि
चिताधूलिविलिप्तांगे नमस्ते चंडचर्चिते ६ मातर्देवि नमस्तेऽस्तु


श्री· २

वरदे पापनाशिनि चिताधूमासिते नित्यं पाहि मां तारिणी प्रिये
७ सदा संतप्तहृदये पुनः पुनः विलोकिनि देहि मे सकलान्का
मान् सर्वदेवस्वरूपिणि ८ शिवास्तोत्रमिदं वत्स बलिं दत्त्वा पठेत्स
कृत् शिवा तस्य भवेत्तुष्टा भीष्टान्कामानवाप्नुयात् एतदज्ञा
नतो मूढा ये जपंति विमोहिताः तेषां निद्रादि दोषेण देवताशाप
माप्नुयात् ९ शिवारूपधरे देवि काम कालि नमोस्तु ते उल्कामु-
खि ललजिह्वे घोररावे सृगालिनि ११ श्मशानवासिनि प्रेते शवमां
सप्रियेनघे आरण्यचारिणि शिवे फेरेजंबुकरूपिणि १२ नमोस्तु
ते महामाये जगत्तारिणि कालिके मातंगि कुक्कुटे रौद्रे कालकालि न
मोस्तु ते १३ सर्वसिद्धिप्रदे भीमे भयंकरि भयावहे प्रसन्ना भव देवेशि

मम भक्तस्य कालिके ४ संसारतारिणि जये जय सर्वशुभंकरि
विस्रस्तचिकुरे चंडि चामुंडे मुंडमालिनि ५ संहारकारिणि क्रुद्धे
सर्वसिद्धिं प्रयच्छ मे दुर्गे किरातशवरि प्रेतासनगते भये ६ अ
नुग्रहं कुरु सदा कृपया मां विलोकय राज्यं प्रयच्छ विकटे वित्त-
मायुः सुतान् स्त्रिय ७ शिवाबलिविधानेन प्रसन्ना भव भैरवि
नमस्तेस्तु नमस्तेस्तु नमस्तेस्तु नमो नमः ८ इत्येतैरष्टभिः श्लोकैः
शिवास्तोत्रमुदीरयेत् एहि एहि जगतां मातर्जननि गृह्ण गृह्ण इमं
सामिषान्नबलिं सिद्धिं देहि देहि शत्रुक्षयं कुरु कुरु ह्लं ह्लं क्रीं क्रीं ह्लुं फ
ट् स्वाहा इत्यनेन मंत्रेण बलिमादौ दद्यात् इति शिवाबलिप्रकारः
समाप्तः ॥ छ ॥ः॥

श्री

२



ॐ ह्रौं ॐ जूं सः भूर्भुवः स्वः त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं उर्वारुकमि
वबंधनान्मृत्योर्मुक्षीय मामृतात् भूर्भुवः स्वरों जूं सः ह्रौं ॥ इति महामृत्युंजयमंत्रः
शुभमस्तु।